Volume-7 | Issue-12 | December-2018 | PRINT ISSN No 2250-1991

ORIGINAL RESEARCH PAPER

Sanskrit

# कालिदासस्य अभिज्ञानशकुन्तले नीतिवचनम्

KEY WORDS: नाटकम्, अभिज्ञानशकुन्तलम्, नीतिवचनम् ।

मधुमिता जाना

संकायाध्यापिका, संस्कृतविभागः, ए.वि.एस. महाविद्यालयः,साँकराइल, झाड़ग्रामः, पश्चिमवङ्गः

ABSTRACT

संस्कृतकवीनामाग्रणीः कालिदासः सर्वैरभ्युपगम्यते । स भारतीयशेक्सपीयरः इत्याख्याते । कालिदासस्य तिस्रः नाट्यकृतयः प्रसिद्धाः शकुन्तलमप्रतिस्पर्द्धिभावेनावस्थितम् । स महाभारतीयां कथामाश्रित्य इदं नाटकं रचितवान् । शिक्षायाः लक्ष्येषु नीतिवचनस्य विकाशः प्रधानविषयः भवति । कर्ण्वस्य गाम्भीर्यः, शकुन्तलायैः कर्ण्वस्योपदेशः प्रभीतीनि विषयेषु नैतिकशिक्षायाः प्रतिविम्वात्मकविषयाः सन्ति । नाटकस्य प्रस्तावनांशे सूत्रधारस्य उपस्थापनकौशलविषये संशययुक्तः दृष्ट्वा समधिकयत्नशीलः भवितुं इच्छति । प्रथमाङ्के दुष्यन्तस्य विनीतवेशेन आश्रमे प्रवेशकाले विनयता प्रकाशते । नाटकस्य विभिन्नाङ्के विविधविषयवर्णनावसरे नीतिवाक्यानि निवद्ध्यानि । अत्र व्यवहारोपयोगी निखिलो विषयः सुनिवद्धो दृश्यते । नाटकस्य समग्रे अंशे विविधैः चरित्रैः वहुषु श्लोकेषु नैतिकविषयानां शिक्षनं प्रतिपादयति । नाटकस्य प्रथमाङ्कात् सप्तमाङ्कपर्यन्तं विविधैः श्लोकैः कालिदासः नीतिशिक्षाविषयकं उदाहरणानि निवद्ध्यानि । अतः मानवजीवने नीतिशिक्षायाः महती आवश्यकता वर्तते । नीतिज्ञानरहितः मनुष्यः समाजे प्रातिष्ठां न लभते ।

कालिदासः संस्कृतकवीनामाग्रणीः इति सर्वैरभ्युपगम्यते । सत्यमेव च कालिदासः भारतीय़शेक्सपीय़रः इत्याख्याय़ते । महाकाब्य, गीतिकाब्य, रूपकेति त्रिविधकाब्यस्य कर्ता कालिदासः आसीत् । कालिदासस्य़ त्रिविधनाटकेषु 'अभिज्ञानशकुन्तलम्' अन्यतमं विद्यते । भारतीयानां मते, ' काब्येषु नाटकं रम्यं तत्र रम्या शकुन्तला ' इति उक्तम् । अभिज्ञानशकुन्तलम् नाटके आदर्शभारतीय़जीवनस्य चित्रणं हि कालिदासस्य़ सर्वोत्तमकृतिः भवति । अत्र सामाजिक- राजनैतिक जीवनमूल्यं महत्वपूर्णं भवति । नाटकस्य वहवः प्रेरणादायकामहत्वपूर्णश्लोकाः नीतिशिक्षां ज्ञापयन्ति । राज्ञः दुष्यन्तस्य कर्तव्यं, अतिथिसत्कारभावना, सुख-दुखस्य स्वाभाविकचित्रणम्, लोकव्यवहारः, वनसंरक्षणं तथा पशुप्रेमभावना आदर्शभारतीयसंस्कृतिः इत्यादिमाध्यमेन नीतिशिक्षाविषयकं उदाहरणानि निवद्धानि ।

महाकविकालिदासस्य 'अभिज्ञानशकुन्तलम्' नाटकस्य सुचनायां प्रथमाङ्कस्य प्रस्तावनांशे आदर्शभारतीयजीवनस्य चित्रणं हि कालिदासस्य सर्वोत्तमः कृतिः भवति । विशेषतः नाटकस्य सूचनायां सूत्रधारः नाटकस्य उपस्थापनकौशलविषये, प्रयोगकौशलविश्वये च संशययुक्तः भूत्वा समधिकयत्नशीलो भवितुं इच्छति । अत्र नटी सूत्रधारेण पात्राणां सावधानतोपदेशार्थम् उक्ते सति - "सुविहितप्रयोगतया आर्यस्य न किमपि परिहास्यते ।"

सुत्रधारः कथयति -
"आ परितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।
वलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥"

अर्थात् प्रज्ञावतां सन्तोषपर्यन्तम् अभिनयकौशलं न समीचीनं स्वीकरोमि । कृताभ्यासानां निपुनतामपि सुहृदयचित्तं स्वविषये अविश्वस्तं भवति । सुत्रधारस्य अभिप्रायोऽयं - यद्यपि अहम् अभिनये कुशलः अस्य नाटकस्य पुर्णसज्जा अपि कृता तथापि मम मनः सफलताविषये सन्देहास्पदमस्ति । यावद् विद्वांसः सन्तुष्टाः न स्युः तावत् स्वस्य अभिनयं साफल्यं न मन्ये अहम् । यतो हि शिक्षितानामपि मनः साफल्यपर्यन्तं स्वस्मिन् अप्रत्ययं भवति । सुत्रधारस्य मते, केनापि स्वकार्यस्य साफल्यम् असाफल्यनिरुपनं न कर्तव्यम् अनैः तत् कर्तव्यम् । तेन कार्यस्य यथार्थ्यमूल्यनिर्धारणं सम्भवति ।

प्रथमाङ्के आश्रमेप्रवेशकाले राजा दुष्यन्तः स्वस्य आभरणानि धनुः च सूतं समीपे अर्पयित्वा प्रविशति । अत्र दुष्यन्तः आह -
"विनीतवेशेन प्रवेष्टव्यानि तपोवनानि नाम ।"

अत्र राज्ञा दुष्यन्तस्य विनयता दृश्यते ।
अपि च तैत्तिरीयसंहितायामस्ति -
"अतिथिदेवो भव" इति पंक्तिः नाटकस्य प्रथमाङ्के शकुन्तलायाः अतिथिसत्कारमाध्यमेन सर्थकतां लभते । महर्षिः कर्ण्वः तस्य अनुपस्थितिकाले शकुन्तलायाः उपरि अतिथिसत्कारस्य भारं दात्त्वा सोमतीर्थं गतः । अस्मिन् समये राजा दुष्यन्तस्य अतिथिसत्कारं शकुन्तला करोति । अतः शकुन्तलायाः अतिथिसत्कारस्य भावना जागृता भवति ।

नाटकस्य द्वितीयाङ्के पशुप्रेमभावना दृश्यते । अत्र राजा दुष्यन्तः आह -
"गहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
छायावद्धकदम्वकं मृगकुलं रोमन्थमभ्यस्यतु ।
विश्रव्धं क्रियतां वराहततिभिर्मुस्ताक्षतिः पल्वले
विश्रामं लभतामिदं च शिथिलज्यावन्धमस्मद्धनुः ॥"
श्लोकमाध्यमेन मनुष्यस्य तथा समाजस्य क्षेत्रे वन्यप्राणीसंरक्षणम् आवश्यकं भवति ।

अपि च -
नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः ।
विश्वासोपगमादभिन्नगतयः शव्दं सहन्ते मृगा-
स्तोयाधारपथाश्च वल्कलशिखानिस्यन्दरेखाङ्किताः ॥"
इति आह ।

प्रत्युत्तरे राजा दुष्यन्तः कथयति -
"यदुत्तिष्ठति वर्णेभ्यो नृपानां क्षयि तत् फलम् ।
तपःषड्भागमक्षय्यं ददत्यारण्यका हि नः ॥"

तृतीयाङ्के प्रणयासक्ता मदनसन्तप्ताशकुन्तलायाः दुरवस्था वर्णनामाध्यमेण कालिदासः वहून् उपदेशान् दत्तवान् ।
चतुर्थाङ्के महर्षिः कर्ण्वः शकुन्तालायै उपदेशं दत्त्वा वदति -
"शुश्रूषस्व गुरुन् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मास्म प्रपीपं गमः
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥"

अर्थात् श्वशुरादि गुरुजनान् शुश्रुषष्व, सपत्नीषु पियसखीवत् व्यवहारं विधेहि, अवमानिता अपि क्रोधेण स्वामिनः विरुद्धं न गच्छ अर्थात् प्रतिकुलवर्तिनी मा भव । सेवकवृन्दे अतिशयेण अनुकूला भव, निजसौभाग्येषु अगर्विता भव । अनेन प्रकारेण युवतयः गृहिणीस्थानं लभन्ते । विपरीताचरणवत्यः युवतयः पितृश्वशुरवंशस्य सन्तापजनिकाः भवन्ति । यदि उक्त श्लोकात् अस्माभिः लव्ध्वा तर्हि समाजे किमपि कलहादि न तिष्ठति ।अपि च चतुर्थाङ्के प्रभातस्य वर्णनावसरे सुख-दूखस्य स्वाभाविकवर्णनं कर्ण्वशिष्यः करोति ।

"यात्येकतोऽस्त शिखरं पतिरोषधीना-
माविष्कृतोऽरुणपुरःसर एकतोऽर्कः ।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवात्मदशान्तरेषु ॥"

अर्थात् वहिर्गतेण काश्यपः शिष्येण अवलोकितं यत् प्रभाता रजनी सद्योद्गतस्य प्रभातस्य अनीर्वचनीयेण सौन्दर्येण समुद्भासितं दिग्मण्डलम् । तथाहि एकतः पश्चिमाकाशे अस्ताचलशिखरमारोहति ओषधिपतिश्चन्द्रः, अन्यतश्च उदयाचलमारोहति अरुणः पुरः सरः किरणमाली सुर्यः । प्रातरेव चन्द्रस्यावनतिस्तथा सूर्यस्योन्नतिः दिक्पथमेति । एतयोः ज्योतिष्कपदार्थयोः एकस्यैव उर्धगमनं अपरस्य अस्ताचलगमनं च युगपदेव व्यसनोदयाभ्यां प्राणिनां शिक्षनीयं यत् - दुःखसुखमिश्रितं हि जीवनम् । अतः प्राणिनां जीवनेषु दुःखादनन्तरं सुखम्, सुखादनन्तरं दुःखं क्रमेणावर्तते । तथाचोक्तं -

"चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च ।"
शकुन्तलायाः वृक्षं प्रति प्रेमभावना कर्ण्वस्य वचनेन उक्तम् -
"पातुं न प्रथमं व्यवस्यति जलं युष्माष्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥"
अर्थात् या शकुन्तला भवत्सु तपोवनतरुषु असिक्तेषु पूर्वं जलं ग्रहीतुं न प्रवर्तते, आभूषनप्रियाऽपि या शकुन्तला तपोवनतरूणामनुरागेण किशलयं न लुनाति । तरूणां पुष्पोद्गमकाले यस्याः शकुन्तलायाः आनन्दसीमा नास्ति सा शकुन्तला पतिगृहं गच्छति भवद्भिः सर्वैः अनुमन्यताम् । वृक्षः अस्माकं जीवनस्याधारः । श्लोकैः प्रकृतिं प्रति मानवस्य अनुरागः सन्दृश्यते । अरण्यसंरक्षणं भावना च जायते ।

नाटकस्य पञ्चमाङ्के यदा कर्ण्वशिष्यः आगतवान् तदा काञ्चुकिः राजानं शिष्याणां आगमनस्य संवादं निवेदयितुं संकोचप्रकाशं कृतवान् । परन्तु राजधर्मस्य अपरिहार्यता चिन्तनेन वदति -
"भानुः सकृद्युक्ततुरङ्ग एव
रात्रिन्दिवं गन्धवहः प्रयाति ।
शेषः सदैवाहितभूमिभारः
षष्ठांशवृत्तेरपि धर्म एषः ॥
अतः प्रजापालनं राज्ञः प्रधानं कर्तव्यम्। वर्तमानसमाजे राजनैतिकजीवने च इदं तत्त्वं महत्वपूर्णम् । अपि च शाङ्गरवः कथयति -
"भवन्ति नम्रास्तरवः फलागमै
र्नवाम्वुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ॥"

वृक्षाः फलोत्पत्तिभिः विनताः जायन्ते । मेघाः नवीनसलिलैः धरणीतलसमीपं आयाति । तथैव सज्जना धनसम्पत्तिभिः गर्वशून्याः भवन्ति। असौ परोपकारिनां स्वभाव एव ।

षष्ठाङ्के धीवरवृत्तान्तमाध्यमेन राज्ञः मनसि शकुन्तलावृत्तान्तं यदा पुनरुदेति तदा विदूषकं निकषा वदति -
"स्वप्नो नु माया नु मतिभ्रमो नु
क्लिष्टं नु तावत् फलमेव पुण्यम् ।
असन्निवृत्त्यै तदतीतमेते
मनोरथा नाम तटप्रपाताः ॥"

अर्थात् कथं शकुन्तला प्रत्याख्यातेति कारणं दुष्यन्तस्य समीपे अज्ञातमेव । सम्प्रति दुष्यन्तस्य मनसि सम्यक् समुद्धुते शकुन्तलया सह प्रणयवृत्तान्ते तस्याः प्रियतमायाः पुनः प्राप्तिः सुदूरपराहता एव । तस्य मनसि समुदिताः विविधाः सम्भवनाः । अतः कारणं विना जगति किमपि न संघटति इति वार्ता प्रकाशयति ।

सप्तमाङ्के दुष्यन्तः मारीचऋषेः दीव्यता-वर्णनाप्रसङ्गेन वदति -
"उदेति पूर्वं कुसुमं ततः फलं
घनोदयःप्राक् तदनन्तरं पयः ।
निमित्तनैमित्तिकयोरयं क्रम-
स्तव प्रसादस्य पुरस्तु संपदः ॥"

अर्थात् कुसुमं पूर्वमुदेति ततः फलमुदेत्येव । आदौ मेघोद्गमः एव तदनन्तरं पयः जलमुदेत्येव । निमित्तनैमित्तिकयोः कार्यकारणयोरयं क्रमः सर्वत्र दृश्यते ।

अभिज्ञानशकुन्तलनाटके विविधैः श्लोकैः वास्तविकजीवनेषु नीतिशिक्षायाः उपदेशः मिलति । प्रकृतिं प्रति अनुरागमाध्यमेन प्रकृतिप्रेम जागर्ति । राजधर्मस्य विवरणं लभ्यते । भारतीयसंस्कृतेः उज्ज्वलदृष्टान्तं विद्यते । महर्षिः कर्ण्वः शकुन्तलायाः विदायकाले विविधैः श्लोकैः यत् नीत्युपदेशं ददाति तत् वर्तमानकाले वहुलप्रासङ्गिकम् एव । राज्ञःदुष्यन्तस्य राजकर्तव्यविषये आलोचनाकाले राजधर्मस्य गुरुत्वानि उद्धृतानि । अतः महाकविः कालिदासः विविधैः चरित्रै वहुषु श्लोकेषु नीतिशिक्षाविषयं प्रतिपादयति । शिक्षायाः लक्ष्येषु नीतिशिक्षायाः विषयः प्रधानविषयः भवति । कण्वस्य गाम्भीर्यं शकुन्तलायै कर्ण्वस्योपदेशः प्रभृति विषयेषु नीतिशिक्षायाः विभिन्नाङ्केषु विविधवर्णनावसरे नीतिवाक्याणि निवद्धानि । अत्र व्यवहारोपयोगि निखिलविषयः सुनिवद्धदृश्यते । अतः मानवजीवने नीतिशिक्षायाः महती आवश्यकता वर्तते । नीतिज्ञानरहितः मनुष्यः समाजे प्रतिष्ठां न लभते । इत्यलं पल्लवितेन ।

## सहाय़क ग्रन्हानि

१. संस्कृतसाहित्येतिहासः, आचार्यः रामचन्द्रमिश्रः, चौखाम्बा विद्याभवन, वाराणसी, २०१३ ।

२. संस्कृतसाहित्येतिहासः, आचार्यः हंसराज अग्रवाल, चौखाम्वा सुरभारती प्रकाशन, वाराणसी, २०१२ ।

३. संस्कृतसाहित्येतिहासः, ड: देवकुमार दासः, श्रीवलराम प्रकाशनी, कलकाता, १४१२ वङ्गाब्द ।

४. संस्कृतशास्त्रमञ्जुषा, ड: उदय़शङ्कर झा. चौखाम्वा सुरभारती प्रकाशन, वाराणसी, २०१४ ।

५. कालिदासस्य रचनासमग्र, वसन्तः भट्टाचार्य, सञ्चिता प्रकाशनी, कलकाता, २०१२ ।

६. संस्कृतसाहित्येतिहासः, युधिष्ठिर गोपः, संस्कृतः वुकडिपो, कलकाता, २००७ ।

७. अभिज्ञानशकुन्तलम्, डः अनिल चन्द्र वसुः, संस्कृतः वुक डिपो, कलकाता, २००७ ।

८. अभिज्ञानशकुन्तलम्, श्री सत्यनारायणः चक्रवर्ति, संस्कृतः पुस्तक भाण्डार, कलकाता, २००४ ।

९. अभिज्ञानशकुन्तलम्, डः प्रणवः कुमार दत्तः, संस्कृतः वुक डिपो, कलकाता, २००६ ।